[६०३] अर्थाच्चासन्निहिते । (म. भा. २.४०१)

अर्थी[1] । असन्निहिते इति किम् ? अर्थवान् ।

[६०४] तदन्ताच्चेति वक्तव्यम् ।

[2]धान्यार्थी । हिरण्यार्थी ।

पुष्कर । पद्म । उत्पल । तमाल । कुमुद । नड । कपित्थ । बिस । मृणाल । कर्दम । शालूक । [3]विगर्ह । करीष[4] । शिरीष । यवास । प्रवास । हिरण्य । पुष्करादिः ॥

## बलादिभ्यो मतुबन्यतरस्याम् । (१३६/१९४२)

बलादिभ्यः प्रातिपदिकेभ्यो मतुप्प्रत्ययो भवति[5] । अन्यतरस्यांग्रहणेन प्रकृतः इनिः समुच्चीयते । बलवान्, बली । उत्साहवान्, उत्साही ।

बल । उत्साह[6] । उद्भाव । उद्वास । उद्वाम । शिखा । पूग । मूल । दंश । कुल । आयाम । व्यायाम । [7]उपयाम । आरोह । अवरोह । परिणाह । [8]युद्ध[9] ॥

## सञ्ज्ञायां मन्माभ्याम् । (१३७/१९४३)

मन्नन्तात् प्रातिपदिकात् मशब्दान्ताच्च इनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेत् सञ्ज्ञा गम्यते । प्रथिमिनी । दामिनी । [10]मशब्दान्तात् – होमिनी । सोमिनी । सञ्ज्ञायाम् इति किम् ? [11]सोमवान् । [12]होमवान् ॥

## कंशंभ्यां बभयुस्तितुतयसः । (१३८/१९४४)

कम् शम् इति मकारान्तौ उदकसुखयोर्वाचकौ, ताभ्यां ब भ युस् ति तु त यस् इत्येते सप्त प्रत्यया भवन्ति मत्वर्थे । कम्बः, कम्भः, कंयुः, कन्तिः[13], कन्तुः, कन्तः, कंयः । शम्बः, शम्भः, शंयुः, शन्तिः[14], शन्तुः, शन्तः, शंयः । सकारः पदसञ्ज्ञार्थः, तेनानुस्वारपरसवर्णौ सिद्धौ भवतः । सञ्ज्ञायां हि असत्यां [15]कम्यः, शम्यः इति स्यात् ॥

## तुन्दिबलिवटेर्भः । (१३९/१९४५)

तुन्दि बलि वटि [16]इत्येतेभ्यो भः प्रत्ययो भवति मत्वर्थे । तुन्दिः इति [17]वृद्धा नाभिरुच्यते, सा अस्यास्ति इति तुन्दिभः । बलिभः । वटिभः । बलिशब्दः पामादिषु पठ्यते, [18]तेन बलिनः इत्यपि भवति ॥

---

1. असंनिहितोऽर्थोऽस्य इति अर्थी याचकः इत्यधिकम् ग. 2. धनार्थी ह. 3. विग्रह ह. 4. शीर्ष इत्यधिकम् ह. 5. अन्यतरस्याम् इत्यधिकम् क. ड. फ. 6. चूडा इत्यधिकम् क. ह. 7. उपमान क. 8. नास्ति ह. 9. सुलाङ्गल इत्यधिकम् ड. 10. मशब्दान्तात् नास्ति फ. 11. सामवान् ह. 12. नास्ति ड. ह. 13. कर्णः इत्यधिकम् क. 14. शर्णः इत्यधिकम् क. 15. कम्युः शम्युः क. 16. इति शब्देभ्यः फ. 17. वृद्धनाभिः क. 18. तेन नास्ति फ.